गोक्तदेवतं ॥२९॥ ऋताषाड्गंधर्वाप्सरसः ॥सनः प्राजापत्या प्रस्तारपंक्तिः स
मुद्रोसिवायव्यानित्रीणिरुचमाग्नेय्यनुष्टुस्त्वावारुणींत्रिष्टुभर्ठ· शुनःशेपः
स्वर्णाग्नेयानि पंचाग्निं युन स्म्याग्नेय्यस्तिस्र आद्येद्वेत्रिष्टुभौपंक्तिस्तृतीयादि
वोद्वेआग्नेय्यौपरोष्णिङ्महापदपङ्क्तीऽष्टौयज्ञोद्भृचंयजमानाग्निदेवत्यंगाल
वआद्योष्णिग्द्वितीयागायत्री ॥३०॥ यदाकूतादष्टर्चमाग्नेयं ॥विश्वकर्म्मणस्तृ
तीयादैवीवाद्याजगतीतिस्रस्त्रिष्टुभश्चतस्रोनुष्टुभोग्निरस्म्यग्न्यद्वैतवादिनींत्रि
ष्टुभंदेवश्रवादेववातश्चभारतावृचोयजुर्वेअग्नयोनुष्टुबाग्नेयी ॥३१॥ वार्त्रह
त्यायसप्तर्चमिन्द्रोपश्यत् ॥ आद्येद्वेवार्त्रघ्न्यौगायत्रीत्रिष्टुभौविश्वामित्रस्यचवि
नोनुष्टुम्मृगोनत्रिष्टुप्प्रथमार्ठ· शासोभारद्वाजोद्वितीयांजयऐंद्रोद्वेवैश्वानर्य्यौगा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स॰नु यन्त्रीत्रिष्टुभौपृष्ठोदिविकुत्सस्यचाश्यामहेत्रिष्टुभावाग्नेय्यौकामवत्यावश्याम सू॰अ॰
२० भरद्वाजस्यचवयंतेकात्यस्योत्कीलस्यचधामछदनुष्टुब्वैश्वदेवी ॥३२॥ अथ २
सौत्रामणीप्रजापतेरार्षं॥ अश्विनोः सरस्वत्याश्चस्वाद्वींत्वानुष्टुप्सुरासोम-
देवत्यासोमोसिचत्वारिसौराणिपरितोभारद्वाजः सौमींबृहतींवायोस्त्रृचोगा
यत्रः सौम्यआभ्रूतेर्ब्रह्मक्षत्रंत्रिष्टुप्सुरासोमदेवत्यानानाहिजगतीसुरासोम
देवत्यातेजोसिपयोदेवत्यान्योजोसिसुरादेवत्यानिषाव्याघ्रर्ठं॰ हैमवर्च्चैरनु
ष्टुब्विषूचिकास्तुतिर्यदापिपेषाग्नेयीबृहतीसंपृचस्थपयोग्रहाविप्रचस्थसु
राग्रहादेवायज्ञंब्राह्मणानुवाकोविर्ठं॰ शांतिरनुष्टुभः सोमसंपत् ॥३३॥ स्करा २०
वतंचतुर्ऋचंत्रैष्टुभं ॥ अश्विसरस्वतींद्रदेवत्यंपितृभ्यः सप्तपित्र्याणिपुनन्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानवर्च्चंपावमानमाद्येद्वेपित्र्ये अनुष्टुभौप्रजापतिस्तृतीयांवैखानसआग्ने-
यींगायत्रींचतुर्थीलिंगोक्तदेवतानुष्टुप्पंचम्याग्नेयीगायत्रीषष्ठ्याग्नेयीब्रा
ह्मीचगायत्रीब्राह्म्यस्तृतीयःपादसौमीसप्तमीसावित्र्यष्टमीनवमीत्रिष्टुद्वै
श्वदेवीद्वेसमानाअनुष्टुभौपित्र्याद्याद्वितीयायजमानाशीर्द्वेस्मृतीत्रिष्टुब्दे
वपानपितृयाणौपंथानौब्रवीतीदर्ठं हविरूयवसानाष्टिर्यजमानाशीः ॥३४
॥उदीरतांत्रयोदशर्च्चंपैत्र्यंत्रैष्टुभर्ठं शंखएकादशीतुजगत्याद्याजानुदश
र्च्चौनुवाकोनवपित्र्यादशम्यैंद्रीगायत्रीतृतीयाचतुर्थीनवम्योनुष्टुभस्त्रिष्टु
भइतराःसोमोराजाष्टर्चमाश्विसरस्वतींद्राअपश्यन्नाद्यास्तिस्रोमहाबृहत्यउ
पांत्याचचतुर्थ्यन्तेअतिजगत्यौशेषेअतिशक्वर्य्यौत्र्यवसानेसीसेनतंत्रमाश्वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरस्वतींद्र देवत्याः षोडशजगत्यः ॥ ३५ ॥ क्षत्रस्ययोनिर्द्विपदागायत्री ॥ आस
न्दीदेवताकामात्वाकृष्णाजिनं मृत्योरुक्माववश्विनोर्भैषज्येन लिंगोक्त देवता
नित्रीणिकोसि प्राजापत्यागायत्री शिरोमे पंचर्चमिन्द्रशरीरावयव देवताकंतृ
तीयागायत्र्यंत्यामहापंक्तिस्त्र्यवसानानुष्टुभोंत्याः प्रतिक्षत्रेवैश्वदेवंत्रयादे
वादैवीपंक्तिस्त्र्यवसानाप्रथमाद्वितीयेवैश्वदेवमाद्यालिंगंलोमान्यनुष्टुब्लिं
गोक्तदेवता ॥ ३६ ॥ यद्देवास्तिस्रोग्निवायुसूर्यदेवत्याअनुष्टुभः ॥ कूष्मांडी
यंद्राग्मेलिंगोक्तदेवतंᳪं समुद्रेते द्विपदाविराडापीद्रुपदादिवानुष्टुबाप्सुद्वय
ᳪंसौर्यनुष्टुप्प्रस्कण्वस्यापो अद्याग्नेयीपंक्तिरेधोसिसमिद्देवत्येयजुषीसमा
ववर्त्यनिरुक्तागायत्रीवैश्वानरज्योतिर्यजुरभ्यादधाम्याग्नेयंस्तृचमानुष्टुभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माश्वतराश्विरर्ठं·शुनासोर्य्यनुष्टुप्सिंचंतिपरिसोथैंन्द्रीचानुष्टुब्धानावंतमैंद्रीगा
यत्रीविश्वामित्रस्यचबृहदिंद्रायबृहतीनृमेधपुरुषमेधयोरध्वर्योगायत्री॥
॥३७॥स्योभूतानामात्मप्रवादापंक्तिः॥नारायणीयाकौंडिन्यस्यप्राणपा
मेह्वेअनुष्टुबुपरिष्टाद्बृहत्यौलिंगोक्तदेवतेसमिद्धइंद्र एकादशाप्रीस्त्रिष्टुभ
आंगिरसइध्मस्तनूनपान्नराशर्ठं·सइडोबर्हिर्द्वारिउषासानक्तादैव्याहोता
रातिस्रोदेवीस्त्वष्टावनस्पतिःस्वाहाकृतयइत्येताआप्रीदेवता आयातुसप्त
त्रिष्टुभऐंद्र्य आमंद्रैर्बृहत्यायातुवामदेवस्त्रातारंगर्गआमन्द्रैर्विश्वामित्रएवे
द्वसिष्ठः ॥ ३८॥ अथहोत्रंत्रिपशोः॥समिद्धोअग्निराप्रीर्द्वादशाविदर्भिरश्वि
सरस्वतींद्रदेवत्याअनुष्टुभोश्विनाहविस्तिस्रोनुष्टुभएकैकाश्विसरस्वतींद्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवत्यायइंद्रइंद्रसवितृवरुणदेवत्यास्तिस्रोनुष्टुभोश्विनागोभिस्तिस्रोनुष्टुभो
युवंपुत्रमिवानुष्टुपूत्रिष्टुभौयस्मिन्नश्वास आग्नेय्यौजगतीत्रिष्टुभावश्विनाते
जसैकादशार्च्चं शस्त्यंगोमद्वृत्समदस्तृचमाश्विनंगायत्रंपावकानोमधुछंदाः
सारस्वतमिंद्रायाह्यैंद्रंमधुछंदा एवानुक्तमानुष्टुभमश्विसरस्वतींद्रदेवत्यं ॥
॥३९॥ इमंमेगायत्रीत्रिष्टुभौवारुण्यौश्शुनः शेपः॥ त्वन्नस्त्रिष्टुभावाग्निवारुण्यौ
वामदेवोमहीमूषुत्रिष्टुबादित्यासुत्रामाणंगयः प्लातः सुनावत्रौस्वर्ग्यागाय
त्र्यानोमैत्रावरुणींगायत्रींविश्वामित्रः प्रबाहवावसिष्ठस्त्रिष्टुभं समिद्धो-
अग्निरेकादशाप्रमा नुष्टुभं स्वस्त्यात्रेयस्यार्षंवयोधाइंद्रोदेवतावसं
तेनऋतुनाषडृचामानुष्टुभंलिंगोक्तदेवतं होतायक्षद्द्वादशाप्रीः प्रैषाअ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्विसरस्वतींद्रदेवत्या अश्विनौछागस्यसप्तलिंगोक्तदेवताः प्रैषावनस्पतिम
भियूपोग्निर्ठं· स्विष्टकृतर्ठं· स्विष्टकृदग्निर्देवंबर्हिरेकादशानुयाजप्रैषा अश्वि
सरस्वतींद्रदेवत्या अग्निमद्यसूक्तवाकप्रैषोलिंगोक्तदेवतोलिंगोक्तदेवतः ॥४०
॥ इतिसर्वानुक्रमणिकायांद्वितीयोऽध्यायः ॥२॥ ॥ॐ अथाश्वमेधश्चतु-
रोध्यायान्प्रजापतिरपश्यत् ॥ तेजोसिसौवर्णंनिष्कमिमामगृभ्णन्संवत्सरोय-
ज्ञपुरुषस्त्रिष्टुभमभिधालिंगोक्तानियो अर्वंतंगायत्र्यर्द्धेनाश्वस्तुतिः परोह्वी
लिंगोक्तोग्नयेलिंगोक्तान्येवाहिंकारायेत्यश्वस्यैकान्नपंचाशच्चेष्टितानिहिरण्य
पाणिंपंचर्चर्ठं· सावित्रंगायत्रमाद्यांमेधातिथिरग्निर्ठं स्तोमेनाग्नेयंतृचंगाय
त्रंर्ठं· सुतंभरोविश्वामित्रोविरूपोयथासंख्यमजीजनोहिपावमानींकृतिंपिपी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिकमध्यामनुष्टुभंत्र्यरुणत्रसदस्यूर्घिभूरश्वदैवतंदेवादेवमिहरंतिराग्ने-
यानिचत्वारिकार्यो दृभणानिलिंगोक्तान्याब्रह्मलिंगोक्तान्येवाध्यायात् ॥ १
॥ प्रजापतयेप्राजापत्यं ॥ यस्तेदेवंयःप्राणतस्त्रिष्टुप्कायीहिरण्यगर्भस्ययुं
जन्तिमधुछन्दाआदित्यदेवत्यांगायत्रींयुंजंत्यस्याश्वस्तुतिर्यद्वातोबृहतीमें
वसवस्त्वालिंगोक्तानिलाजीं ३ नश्वदेवत्यंकःस्विच्चतस्रोनुष्टुभःप्रश्नप्रतिप्रश्न
भूताब्रह्मोद्येहोतुर्ब्रह्मणाश्चवायुष्वालिंगोक्तानिसठं॰शितास्तिस्रोश्वदेवत्या
अनुष्टुब्विराड्त्रिष्टुभोग्निःपशुराश्चानित्रीण्ययंवेनुष्टुबश्वस्तुतिर्गणानांत्वाच-
त्वारिलिंगोक्तानि ॥ २ ॥ उत्सक्त्थ्यागायत्र्याश्वी ॥ यकादशर्चमानुष्टुभंद्वि
तीयात्परिष्टाद्बृहत्यध्वर्य्वादीनांकुमार्यादिभिरश्लीलभाषणंताएवदेवता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दधिक्राव्णोदधिक्रावावामदेव्यः सुरभिमतीमनुष्टुभमाश्वींगायत्रीर्ठं षड्ऋच
माश्वमुष्णिगाद्याचतस्रोनुष्टुभोंत्यात्रिष्टुप्कस्त्वाषड्ऋचमाश्वमाद्यागायत्रीपंचा
नुष्टुभः कः स्विदष्टादशर्च्चंब्रह्मोद्यर्ठं होत्रादीनांप्रश्नप्रतिप्रश्नभूतमाद्याश्चत
स्रोनुष्टुभः कास्विदाद्याश्चतस्रश्चांत्यादशात्रिष्टुभः सुभूरनुष्टुब्लिंगोक्तदेवता
होतायक्षत्प्राजापत्यः प्रैषः प्रजापतेर्हिरण्यगर्भः प्राजापत्यांत्रैष्टुभं ॥३॥ अ
श्वस्तूपरइत्यादयः ॥ पशवोध्यायेनोक्तादेवतावापर्यंग्यास्तथारोहितादयो
गुणयुक्ताः आरण्याश्चकपिंजलादय आध्यायाच्छादंदद्भिरित्यादित्वगित्येत
दंतंद्रव्यदैवतमुक्तम् ॥४॥अश्वस्तूपरोब्राह्मणोध्यायः ॥ शादंदद्भिस्त्वचांतश्च
जुंबकायवारुणींद्विपदांसुंडिभओदन्यएषाचाघनाशन्यंतर्ज्जले यस्येमेका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्ठ्योत्रिष्टुभौहिरण्यगर्भः प्राजापत्य आनोदशार्द्धंजागतंवैश्वदेवंगोतमः-
स्वस्तिनोविराड्स्थानाभद्रंकर्णेभिस्तृचंत्रैष्टुभंमानोश्वस्तोमीयंदीर्घतमास्त्रै
ष्टुभंद्वाविंशऽशत्सृचमश्वस्तुतिस्तृतीयाषष्ठ्यौजगत्याविमानुद्वेपदंवैश्वदेवं
तृचंभौवनआप्त्योवासाधनभौवनोवा ॥५॥ अग्निश्चसप्तलिंगोक्तानि॥ प्रि
योदेवानांलौगाक्षिरनुष्टुभमनवसानांबृहस्पतेगृत्समदोब्राह्मींत्रिष्टुभमिंद्र
गोमन्नैंद्यौगायत्र्यौरम्याक्षिर्ऋतावानंप्रादुराक्षिर्वैश्वानरीयांवैश्वानरस्य
त्रिष्टुभंकुत्सोग्निर्ऋषिराग्नेयींगायत्रींवसिष्ठभरद्वाजौमहाँ२॥ऽइंद्रोमाहैंद्रीं
वसिष्ठस्त्वंवऐंद्रींपथ्याबृहतींनोधागोतमोबद्वाहिष्टंवसूयवआग्नेयीमनुष्टुभ
मेहिभरद्वाजोगायत्रीमृतवस्तेबृहतीत्युपक्षरेवत्सोगायत्रीं॥६॥उच्चातेगाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रंतृचर्ठः सौम्यमामहीयवोनुर्वीरैर्मुद्गलो यज्ञपुरुषस्त्रिष्टुभमग्नेपत्नीर्मेधा
तिथिराग्नेयींगायत्रीमाभियज्ञंभृचमृतु दैवतंमेधातिथिस्तवाय मैत्रीत्रिष्टु
भंविश्वामित्रोमेवनोजगतींगृत्समदःस्वाधिष्ठयामधुछंदाः सौम्यावनुक्ता
नांगायत्र्यर्ठः ॥ ७॥ समास्त्वाग्निकोध्यायः ॥ प्रजापतेरार्षर्ठः सामिधेन्योन
वाग्नेय्यस्त्रिष्टुभोग्निनादृष्टा अग्निर्ऋषिः कर्मागभूतमग्नि छं स्तौत्यूर्द्धाद्वा-
दशार्च्चमाग्रियमोष्णिहं विषमपदंप्राजापत्यमाग्नेयमग्निरपश्यदग्निर्हिप्र
जापतित्वेनसंस्तूयतेतेनप्राजापत्यं ॥ ८॥ पीवो अन्नाद्देवायव्ये त्रिष्टुभौव
सिष्ठः ॥ आपोहद्दे प्राजापत्ये हिरण्यगर्भः प्राजापत्यः प्रयाभिर्द्वेवायव्येव
सिष्ठोनियुत्वान्वायव्याः षड्वायोश्शुक्रोनुष्टुबेकयाचत्रिष्टुबंत्यागायत्र्योनियु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 त्वाचायोषेगृत्समदोवायोशुक्रः पुरुमीढाजमीढौतववायोव्यश्व आङ्गिर
सोभित्वा वसिष्ठ ऐंद्रं प्रगाथं प्रथमा बृहती द्वितीयासतोबृहतीत्वामिदेव
ठ॰शंयुर्बार्हस्पत्यः कयान ऐंद्रं तृचं गायत्रं वामदेवोंत्यानुपादनिचृद्यज्ञाय
ज्ञावऊर्जोनपातठ॰शंयुःपाहिनोभर्गः प्रागाथएतं तृचं प्रागाथमाग्नेयं द्वेबृ
हत्यौतृतीयासतोबृहती संवत्सरोस्याग्नेयं ॥ ९॥ इंद्रमिडः सौत्रामणिको-
ध्यायः ॥ एकादशप्रयाजप्रैषा ऐंद्रा आप्रीदेवत्या आद्येनुवाके देवं बर्हिरनु
याजप्रैषा ऐंद्रा एकादशैवाग्निमद्येन्द्रः सूक्तवाकप्रैषस्त्वामद्य प्रतीकउभयत्रा
पिसमिधानं महद्वायोधस आप्रिय एकादशप्रयाजप्रैरवास्तथैव देवं बर्हिरनु
याजप्रैरवा अग्निमद्यवायोधसः सूक्तवाकप्रैषः ॥ १०॥ समिन्द्धो अंजन्नाम्ब

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मेधिकोध्यायः ॥ आद्याआप्रीस्त्रिष्टुभएकादशाश्वस्तुतिर्बृहदुक्थोवामदे
व्योददर्शाश्वोवासामुद्रिर्यदक्रंदस्त्रयोदशाश्वस्तुतिस्त्रिष्टुभोभार्गवोजम
दग्निर्ददर्शदीर्घतमाश्वसमिद्धोअद्यद्वादशाप्रीस्त्रिष्टुभोजमदग्निः ॥ ११ ॥
केतुंकृण्वन्नाग्नेयीमनिरुक्तांगायत्रींमधुछन्दाः ॥ जीमूतस्येवपायुर्भार
द्वाजःसंग्रामांगान्वृक्षौस्तौषीत्सन्नाहंकार्मुकंगुणमार्लीतूणंजगत्यर्द्धेन
सारथिमर्द्धेनरश्मीन्हरीन्नरथर्ठंरथगोपामित्यन्जगत्यालिंगोक्तदेवता-
द्वाभ्यांत्रिष्टुबनुष्टुभ्यामिषुमनुष्टुभाकश्यांततोहस्तघ्नंततस्त्रिचोरथदुंदुभि
देवत्यावेंद्रोर्द्धर्चोन्त्यःसर्वास्त्रिष्टुभोनुक्ताआग्नेयःकृष्णग्रीवइत्याद्याएकाद
शिन्योर्द्वयोःपशुदेवताअग्नयेगायत्रायेतिदशाहविषोवेष्टेर्द्देवता ॥ १२ ॥ दे

CC-0. In Public Domain. Digitization by eGangotri

वसवितुर्द्वावध्यायौ ॥ पुरुषमेधोनारायणः पुरुषोददर्शविश्वानि देवगाय
त्रीर्ठ॰ सावित्रीर्ठ॰ श्यावाश्वोविभक्तारं मेधातिथिर्ब्रह्मणे ब्राह्मणमितिद्वेकं
डिकेतपसेनुवाकश्चब्राह्मणं ॥१३॥ सहस्रशीर्षाषोडशर्च्चमानुष्टुभं ॥ त्रिष्टु
बंत्यंपुरुषोजगद्बीज मन्त्र देवताश्चः षड्चउत्तर नारायणो मंत्र आद्यास्ति-
स्रस्त्रिष्टुभोद्वे अनुष्टुभावंत्यात्रिष्टुप् ॥१४॥ तदेवसर्वमेधोध्यायः ॥ आत्म
दैवतः सप्तमेहनि सर्वहोमेविनियुक्तः सर्वमेधंब्रह्मस्वयंभ्वैक्षततदीयंमं
त्रगणंप्रवायुमछेत्येतस्मादाद्येद्वे अनुष्टुभौनतस्याद्विपदागायत्रीहिरण्य
गर्भश्चितस्रोमामाहिर्ठ॰ सीद्यस्मान्नद्वे एताः प्रतीकचोदिताब्रह्मयज्ञेध्ये-
याः सर्वत्रैवमेषोहचतस्रस्त्रिष्टुभ आपोहयश्चित्प्रतीकचोदिते ॥१५॥ वेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्वसंचत्रिष्टुभः ॥ सदसस्पतिंत्रिचेनमेधाकामोमेधांयाचतेप्रथमागायत्रीलिं
गोक्तदेवताद्वितीयाग्नेय्यनुष्टुप्तृतीयालिंगोक्तदेवतानुष्टुबिदम्मेमांत्रव
र्णिक्यनुष्टुबेतयादेवेभ्यःश्रीकामोयाचतेश्रियं ॥ १६ ॥ अस्याजरासः ॥ सप्त
दशाग्निष्टुत्याग्निष्टोमिकेप्रथमेहनिपुरोरुचआग्नेय्यआद्येद्वेऐंद्रवायवस्या
स्याजरासोवत्सप्रीईरयोधूमकेतवोविरूपोयजमानोद्वेमैत्रावरुणस्ययज
मानोगोतमोद्वेविरूपेशुक्रस्यकुत्सोयमिहमंथिनोवैश्वदेवग्रहग्रहणेत्रीणि-
शताविश्वामित्रऐंद्राग्नस्याग्निर्वृत्राणिभरद्वाजोवैश्वदेवस्यविश्वेभिःसोम्यंमे
धातिथिरायन्मरुत्वतीययोर्द्वेआयत्पराशरः शाक्त्योग्नेशर्द्धात्रिदुहिताविश्ववः
वारात्वाठंहिभरद्वाजस्त्वेअग्नेद्वेबृहत्यावादित्यस्यत्वेअग्नेवसिष्ठःश्रुधिप्रस्क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ण्वआदित्यग्रहग्रहणेविश्वेषामदितिर्वामदेवोगोतमोमहोअग्नेःसावित्रस्यलु
शोधानाकोनुक्तंगायत्रंत्रैष्टुभं ॥ १७॥ इन्द्रस्तुत्युत्थ्येद्वितीयेहनि ॥ ऐंद्रः पुरोरु-
चोद्वादशप्रतीकचोदितेचद्वेतिस्त्रश्चापाश्विद्वसिष्ठोगावउपपुरुमीढाजमीढोय
द्घवसिष्ठआसुतेसुनीतिरातिष्ठतंविश्वामित्रःप्रवःसुचीकोबृहन्नित्रिशोक
इंद्रेहिमधुछंदाइंद्रोवृत्रविश्वामित्रःकुतस्त्वमगस्त्यआतद्रौरीविंतिशाक्त्यइ
मान्तेकुत्सोजगतीमनुक्तंगायत्रंत्रैष्टुभं ॥१८॥ सूर्यस्तुत्युत्थ्येतृतीयेहनि ॥ सौर्य
चतुर्दशपुरोरुचस्तिस्त्रश्चप्रतीकोक्ताविभ्राड्बृहज्जगतींविभ्राड्ढ्रौर्यउदुत्यति
स्त्रः प्रस्कण्वआनोगस्त्योषदघश्रुतकक्षसुतंकक्षीतरणिःप्रस्कण्वस्तत्सूर्य्य-
स्यद्वेकुत्सोबणमहाँ२॥ द्वेजमदग्निर्बृहतीसतोबृहत्यौश्चायंतइवनृमेधोबृह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तींमत्यद्यादेवाःकुत्स आकृष्णोनहिरण्यस्तूप आङ्गिरसोनारव्यातर्ठं सौर्यङ्गा
यत्रंत्रैष्टुभं ॥१९॥ वैश्वदेवस्तुतिचतुर्थेहनि ॥ वैश्वदेव्यः पुरोरुच एकादशाष
द्व प्रतीकोक्ताः प्रवावृजेवसिष्ठस्त्रिष्टुभइंद्रवायुबृहस्पतिंद्वेमेधातिथिरधिनः
कुसीदीकाण्वोग्न इन्द्र प्रतिक्षत्र इन्द्राग्नी मित्रावरुणाजगतींकाश्यपोवत्सा
रोस्मेरुद्राः प्रगाथोर्वांचो अद्यकूर्म्मोगार्त्समदो विश्वेअद्यकुशाधानाकोवि
श्वेदेवाः सुहोत्रोदेवेभ्योहिवामदेवोजगतीमनुक्तंगायत्रत्रैष्टुभं ॥२०॥अथाऽ
नारभ्याधीतंमंत्रगणं ॥ अर्वाक्पितृमेधादादित्ययाज्ञवल्क्यौ ददृशतुः प्रवा
युंपंचदशर्च्चः पुरोरुगाणोद्वेच प्रतीकोक्ते प्रवायुमृजिश्वोमित्रर्ठं हुवेद्वेमधुछ
न्दामित्रंलिंगोक्तादस्त्वाशुवाकव आश्विनीं विदद्यद्यैन्द्रींकुशिकोनहिस्पशांविश्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स·नु मित्रोवैश्वानरीमुग्रावि घनिनैंद्राग्नीं भरद्वाजउपास्मैसौमीन्देवलोसितोवाये- सू·अ·
२८ त्वाविश्वामित्रोजनिष्ठाउग्रोगौरीवितिरातु वामदेवस्तृच मैन्द्रं त्वमिन्द्रं द्यौ नृमे ३
धः पथ्याबृहती सतोबृहत्यौयज्ञोदेवानांकुत्सोदब्धेभिः साविन्नींजगतींभर
द्वाजः ॥ २१ ॥ प्रवीरयापंचदशार्च्चः पुरोरुगाणाः ॥ द्वेचप्रतीकोक्तेप्रवीरयावसिष्ठो
वायव्यांकाव्ययोराजानेषुदक्षास्त्तिरश्चीनः परमेष्ठी प्रजापतिर्भाववृत्तंतृचमारो
दर्सीजगतीं विश्वामित्रउक्थे भिर्वृत्रहंतमावसिष्ठउपनः सुहोत्रोवैश्वदेवींब्रह्मा-
णिमेगस्त्योद्वे इंद्रमरुत्संवादे तार्द्दिदाथर्वणो बृहद्दिव इमाउत्वाद्वेबृत्यौमेधाति
थिरयर्ठं·सहस्त्रंमेधातिथिः सतोबृहतीं ॥ २२॥ आनस्त्रयोदशार्च्चः पुरोरुगाणः ॥ २८
चतुर्ऋचंप्रतीकचोदितंचानोवायव्यांजमदग्निरिन्द्रवायूसुसन्दृशैंद्रवायव्यां

CC-0. In Public Domain. Digitization by eGangotri

तापसक्रुधागित्था मैत्रावरुणीं जमदग्निरायातमाश्विनीं वसिष्ठः प्रैतु वैश्वदे
वीं कण्वश्चन्द्रमा अप्स्वैंद्री माकुती परिणामवादिनीं त्रित आस्यो देवं देवं वोम
नुर्वैवस्वतो वैश्वदेवीं दिविपृष्टोमृध ऐन्द्र इन्द्राग्नी अपात्सु होत्रो देवासो हि म
नुरयां धमहे नृमेधोस्येन्मेधातिथिर्दशाम्येकादश्यंत्याचसतो बृहत्यः शेषा
बृहत्यः शेषा बृहत्यः ॥ २३ ॥ इति सर्वानुक्रमणीये तृतीयोऽध्यायः ॥ ३ ॥ ॥
यज्जाग्रतः षडृचं मानसं त्रैष्टुभं षठं शिवसंकल्पः ॥ पितुन्नूष्णिह मगस्त्योन्नस्तु-
तिमन्विच्चतुर्ऋचमानुष्टुभं द्वयोरनुमितिर्द्वयोः सिनीवालीसरस्वत्यौ सिनीवाली
पृथुष्टुके द्वे गृत्समदस्त्वमग्ने द्वे आग्नेय्यौ जगत्यौ हिरण्यस्तूप आंगिरस उत्ता
नायां द्वे देवश्रवा देववातश्च भारता वाद्या त्रिष्टुब्द्वितीयानुष्टुप्प्रमन्महे नोधा द्व्यृच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मैन्द्रं त्रैष्टुभमिच्छन्तित्वाश्वृचमैन्द्रं त्रैष्टुभमेव देवश्रवादेववातश्च भारती ॥ १ ॥
अषाढं षुत्सु गोतमः ॥ चतुर्ऋचं त्रैष्टुभं सौम्यमष्टौ व्यरव्यच्चतुर्ऋचं त्रैष्टुभं सा
वित्रमांगिरसो हिरण्यस्तूपो द्वितीया जगत्युभापिबतु माश्विनं तृचमुभापिबतं
प्रस्कण्वो गायत्री मन्यस्वती माश्विना त्रिष्टुभो कुत्स आरात्रि पत्थ्या बृहतीं रा
त्रिदेवत्यां कशिपा भरद्वाजदुहितोषस्तद्दुःखस्यां परोष्णिहं गोतमः प्रातरग्निं
वसिष्ठः सप्तर्चमाद्या जगती बहुदेवत्या पंच भगदेवत्यास्त्रिष्टुभोंत्योषस्याः
॥ २ ॥ पूषन्त वसुहोत्रः ॥ पथस्पथः परिपतिमृजिश्वैतेपो छ्यो गायत्री त्रिष्टु
भो त्रीणि पदा वैष्णव्यो गायत्र्यो मेधातिथिर्घृतवती भुवनानां भरद्वाजो द्या
वापृथिव्यां जगतीं येनो लिंगोक्तदेवतां त्रिष्टुभं विहव्य आना सत्या हिरण्यस्तूप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आश्विनी मेषवो मारुतीं त्रिष्टुभमगस्त्यः सहस्तोमा ऋषिसृष्टिप्रतिपादिकां
त्रिष्टुभं यज्ञः प्राजापत्य आयुष्यं वर्चस्यं तृचं दक्ष उष्णिक् शाकरी त्रिष्टुभो हिर-
ण्यस्तुतिरुतनऋत्विजो बहुदेवत्या त्रिष्टुभमिमां गिरः कूर्मो गार्त्समद आदि
त्यदेवत्यां त्रिष्टुभं ६ सप्तऋषयो ध्यात्मवादिनी जगत्युत्तिष्ठं तृचो ब्राह्मणस्प
त्य आद्ये बृहत्यौ कण्वो घोरोंत्यां त्रिष्टुभं गृत्समदो य इमा चतुर्ऋचं प्रतीकोक्तं
॥३॥ अपेतोध्यायः ॥ पित्र्य आदित्यस्य देवानां वाद्या गायत्री परं यजुः सविता
ते गायत्री वायुः पुनातु चत्वारि लिंगोक्तानि सविता ते गायत्री परं मृत्यो संकसुक-
स्त्रिष्टुभं मृत्युदेवत्या ७ शं वातो नुष्टुप् बृहत्यौ वैश्वदेव्या वश्मन्वती सुचीक-
स्त्रिष्टुभ वैश्वदेवीमपाघं लिंगोक्तदेवता मनुष्टुभ ७ शुनःशेपो दुःस्वप्ननाशनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मनड्वाहमानडुह्यनुष्टुबिमंजीवेभ्यः संकसुकोमृत्युदेवत्यांत्रिष्टुभमायुष्मान
ग्नआग्नेयींत्रिष्टुभंवैखानसः परीमेनुष्टुभमैंद्रींभारद्वाजः शिरिंबिहः क्रव्या
दमग्निंत्रिष्टुभंमाग्नेयींदमनोवहवपांजातवेदसीत्रिष्टुप्स्योनापृथिवीमेधा
तिथिः पार्थिवींगायत्रींमस्मात्वमाग्नेयींगायत्र्यानिरुक्ता ॥ ४ ॥ ऋचंवाचंपंचा
ध्यायीं ॥ दध्यङाथर्वणोददर्शाग्निकाश्वमेधिकवर्ज्जमाद्योध्यायः ॥ शांत्यर्थो
वैश्वदेव आद्यानियजूꣳषियन्मेबार्हस्पत्यापंक्तिः कयात्वमैन्द्र्यानिरुक्तागा
यत्रींद्वोविश्वस्यविराड्‌द्विपदाशन्नोद्वे अनुष्टुभावहानिद्विपदागायत्रीशन्न
इन्द्राग्नीत्रिष्टुबायत्र्यावंत्याशीर्द्यौः शांतिर्यजूꣳषिनमस्तेअस्त्वनुष्टुभौत
च्चक्षुः पुरउष्णिक्सौरी ॥ ५ ॥ आददेनारिरस्यश्विदैवतं ॥ देवीद्यावापृथिव्यं

CC-0. In Public Domain. Digitization by eGangotri

देव्योवम्र्यो वल्मीकवपेयत्यग्रेवराहविहतमिन्द्रस्यौज आदाराः प्रैतुमरवस्या
श्वस्यर्ज्जवेघमायदेवस्त्वार्च्चिरसिघर्मदेवत्यानियोघर्मस आदित्योय एष
तपत्यनाधृष्टापुरस्तात्ससपार्थिवानियजमानाशीर्मधुप्राणदेवत्यानिगर्भो
देवानामवकाशामामाहिर्ठंसीरित्येतदंताघर्मदेवत्याधर्तादिवऊर्द्ध्व बृहत्य
पश्यंगोपांत्रिष्टुभंदीर्घतमात्हदेवा परोष्णिक्त्वष्टेमन्तः पत्न्याशीरहः केतुना
यजुषीघर्मदेवत्ये ॥६॥ आददेदित्यै रज्जुः॥ इड एहिगौर्यस्ते त्रिष्टुभंदीर्घत
मा इन्द्राश्विनावैश्वदेवानिसमुद्रायत्वावातनामानिस्वाहाघर्मायघर्मदेव
त्येविश्वा आशा आश्विन्यनुष्टुब्दिविघाघर्मदेवत्यमश्विनाघर्मंमुष्णिगपा
तांककुबमेन्न्यस्मेरवरः स्वाहापूष्णेससालिंगोक्तदेवतानिस्वाहासंपयोदेवत्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स॰नु मधुहुतंघर्म्मोभीमंगायत्रीबृहत्यावनवसानेअतिशक्करीवाग्नेयीसमस्ता सू॰अ॰
३१ त्र्यवसानायातेघर्मक्षत्रस्यबृहतीचतुःसक्तिर्महाबृहतीर्घर्मैतदनुष्टुबचिक्र ४
दस्मरोष्णिग्यावतीद्यावापृथिवीदधिघर्मोमयित्वत्पंक्तिर्यजमानाशीःपय
सोरेतोगायत्र्यनवसानात्विषःसंवृग्दधिघर्मोनुक्तंघर्मदैवतं ॥७॥स्वाहा
प्राणेभ्योमांत्रवर्णिक्योदेवता॥ मनसःकाममनुष्टुब्यजमानाशीःश्रीर्देवता
प्रजापतिःसंभ्रियमाणोयथाकालंप्रायश्चित्तदेवताःसवितात्रथमेहन्यत्य-
हंक्रमेणोग्रश्चमारुतीगायत्रीविमुखाख्योमंत्रोग्नौविनियुक्तस्तस्मादाग्नि
कएवास्यऋषिःपरमेष्ठीप्राजापत्योवाग्निर्ठंहृदयेनाश्वमेधिकानित्रीणि ३१
तंत्रोक्तएवऋषिर्लोमभ्यःस्वाहेतिप्रायश्चित्ताहुतयोद्विचत्वारिंशत् ॥८॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईशावास्यमात्मदेवत्य आनुष्टुभोध्यायः ॥ अनेजदेकं त्रिष्टुप्सपरिजगतीवा
युरनिलं यजुर्षीॐ ३ ॥ मितिपरमाक्षरस्ययोगिनामालंबभूतस्यपरस्यब्रह्म
णः प्रणवाख्यस्यास्थूलादिगुणयुक्तस्यब्रह्मऋषिछंदोगायत्रंपरमात्मादेव-
ताब्रह्मारंभेविरामेचयागहोमादिषुशांतिपुष्टिकर्मसुचान्येष्वपिकाम्यनैमित्ति
कादिषुसर्वेषुविनियोगोस्यक्रतोत्रिभिर्य्यजुर्भिरंतेयज्ञान्योगीस्मारयत्यग्ने
नयांतेनमस्कारोक्तिर्हिरण्मयेनादित्योपासनमोॐ ३ मितिनामनिर्देशोब्रह्म-
णः खंब्रह्मेत्याकाशरुपमन्तेब्रह्मध्यायेत् ॥ १ ॥ अथातश्छन्दोदेवता ॥ गायत्र्या
अग्निरुष्णिहः सवितानुष्टुभः सोमोबृहत्याबृहस्पतिः पंक्तेर्वरुणस्त्रिष्टुभइन्द्रो
जगत्याविश्वेदेवाविराजोमित्रः स्वराजोवरुणोतिछन्दसः प्रजापतिर्विछन्दसो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वायुर्द्विपदायाः पुरुष एकपदायाब्रह्मासर्वास्त्रच आग्नेय्यः सर्वाणियजूꣳषिवा
यव्यानि सर्वाणिसामानि सौराणि सर्वाणि ब्राह्मणानिचस्वाहाकारस्याग्निर्व
षट्कारस्य विश्वेदेवाः कर्मारंभेमंत्राणांदेवतावेदितव्याः सन्यस्य मनसिदेव-
तांततोहविर्हूयते देवतामविज्ञाययोजुहोति देवास्तस्यहविर्नजुषन्तेस्वाध्या
यमपियोधीतेमंत्रदेवतज्ञः सोमुष्मिँल्लोके देवैरपीड्यतेतस्माच्चदेवतावेद्यामं
त्रेमंत्रेप्रयत्नतोमंत्राणांदेवताज्ञानान्मंत्रार्थमधिगच्छति मंत्रार्थज्ञानात्तुविधू
तपाप्मानाकमभ्येतिनहि कश्चिदविज्ञाययाथातथ्येन देवताः श्रौतानांकर्म
णांविप्रः स्मार्तानांचाश्नुतेफलम् ॥१०॥ अनादिष्टमध्वरादौ ॥ सर्वंतकर्मणीप
रिभाषितंमंत्रगणंवक्ष्यामः सर्वमाग्नेयंगायत्रंगौतमीयꣳ सर्वꣳ साविन्नमौ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्णिहंभारद्वाजीयर्ठ॰सर्वर्ठ॰सौम्यमानुष्टुभमाथर्वणिकर्ठ॰सर्वंबार्हस्पत्यंबार्हतमा
ङ्गिरसर्ठ॰सर्वंवारुणंपांक्तमालंबायनीयर्ठ॰सर्वमैंद्रंत्रैष्टुभंयाज्ञवल्कीयर्ठ॰सर्वमादि
त्यदैवतंजागतंकौत्सं ॥११॥ ज्योतिष्टोमेदीक्षाप्रभृति ॥ वक्ष्यामोदीक्षायांभृगुर
ग्नाविष्णुगायत्रीप्रापणीयआंगिरसोदितिरुष्णिक्क्रयेविश्वामित्रः सोमोनुष्टु-
बातिथ्येवसिष्ठोविष्णुबृहतीप्रवर्ग्येकश्यपआदित्यपङ्क्तिः रुपसत्स्वात्रेयउपस
द्देवतात्रिष्टुबग्नीषोमीयेगस्त्योग्नीषोमौजगतीप्रायणीयेतिरात्रआग्निवेश्यो
होरात्रेअतिजगतीचतुर्विर्ठ॰शत्यहेसौकरायणः संवत्सरः शक्वर्यभिप्लुवेषडहे
सौवर्णोर्द्धमासामासाश्चातिशक्वरीपृष्ठ्येषडहेसायकायनऋतवोष्ठिरभिजिति
प्रियघृतोग्निरत्यष्टिः स्वरसामसुसरस्वत्यापोधृतिर्विषुवतिरौहिणायनआदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स॰नु त्योतिर्धृतिर्विश्वजितिसौभरइन्द्रः कृतिर्गौआयुषोर्वाकलिर्मित्रावरुणौप्रकृति सू॰अ॰
३३ र्दशरात्रआचार्योविश्वेदेवाआकृतिर्दाशरात्रिकेपृष्ठ्येषडहेभाल्लवेयोदिशोविकृ ४
तिश्छन्दोमेषुशौल्वायनइमेलोकाः संकृतिर्दशमेहनिपराशरः संवत्सरोभिकृति
र्महाव्रतेशैलिनः प्रजापतेरुत्कृतिरुदयनीयेतिरात्रेभौवायनोवायुश्छन्दांसिस
र्वाणि॥१२॥ऋषिभिरुपलक्षितंवाक्यं॥ ऋषयश्छंदोभिरुपलक्षितादेवतामं
त्रवर्णाऋग्यजुःषयोर्विनियोगतश्च विज्ञेयाः सर्वमेतच्छन्दोदैवतमार्षंचविज्ञा
ययत्किंचिज्जपहोमादिकरोतितस्यफलमश्नुतेब्रह्मयज्ञारंभेयथाविधिस्ना-
त्वाछन्दः पुरुषमेनोनिर्णोदनं शरीरन्न्यसेतिर्य्यग्बिलश्चमसऊर्ध्वबुध्नस्त- ३३
स्याक्षिणीगोतमभरद्वाजौश्रोत्रेविश्वामित्रजमदग्निनासिकेवसिष्ठकश्यपौवा

गात्रिर्गायत्रींछंदोग्निर्देवताठं·शिरसिविन्यसेदेवमेवोष्णिहठं·सवितारंग्रीवास्व-
नूकेबृहतींबृहस्पतिंबाह्वोर्बृहद्रथन्तरेद्यावापृथिवीमध्येत्रिष्टुभमिन्द्रठं·श्रोण्यो
र्जगतीमादित्यंमेढ्रेतिछंदसंप्रजापतिंपायौयज्ञायज्ञियंवैश्वानरमूर्वोरनुष्टुभं
विश्वान्देवानष्ठीवतोः पंक्तिंमरुतःपादयोर्द्विपदांविष्णुंप्राणेषुविछंदसंवायुन्न्यू
नातिरिक्तेष्वङ्गेषून्न्यूनाक्षरंछंद आपोदेवतेत्येवठं·सर्वांगेषुयोजयित्वावेदम-
यःसंपद्यतेशापानुग्रहसमर्थोभवतिब्राह्म्यंतेजश्चवर्द्धतेनकुतश्चिद्भयंविन्दत
ऋङ्मयोयजुर्मयःसाममयस्तेजोमयोब्रह्ममयोमृतमयः संभूयब्रह्मैवान्येतित
स्मादेतन्नाब्रह्मचारिणेनातपस्विनेनासंवत्सरोषितायानाप्रवक्त्रेतुब्रूयाद्नेना-
धीतेनचांद्रायणाब्दफलमवाप्नोत्यनेनचसम्यग्ज्ञानेनब्र ह्मणःसायुज्यठं·सलो

कत्तामाप्नोत्याप्नोत्याप्नोति ॥१३॥ इतिसर्वानुक्रमण्यांचतुर्थोऽध्यायः ॥४॥ ॥
अथछंदाꣳसिगायत्र्युष्णिक् ॥ अनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यतिजगतीशक्वर्य
तिशक्वर्यष्ट्यत्यष्टिधृत्यतिधृतयः कृतिप्रकृत्याकृतिविकृतिसंकृत्यभिकृत्युत्कृत
यश्चतुर्विꣳशत्यक्षरादीनिचतुरुत्तराण्यूनाधिकेनैकेननिचृद्भुरिजौद्वाभ्यांविरा
ट्स्वराजौपादपूर्णार्थंतुक्षैप्रसंयोगैकाक्षरीभावान्व्यूहेदाद्येतुसप्तवर्गेपाद
विशेषान्संज्ञाविशेषास्तानमनुक्रामंतएवोदाहरिष्यामोविराड्रूपाविराट्-
स्थानाश्चबहूनाअपित्रिष्टुभएवेत्युद्देशस्तत्रदशैकादशद्वादशाक्षराणांवै
राजत्रैष्टुभजागताइतिसंज्ञाअनादेशेष्टाक्षराःपादाश्चतुष्पदाश्चर्चः ॥१॥ ३४
प्रथमंछन्दस्त्रिपदागायत्री ॥ पंचकाश्चत्वारः षट्कश्चैकश्चतुर्थश्चतुष्कोवाप

दपंक्तिःषट्सप्तैकादशाउष्णिगार्भात्रयसप्तकाःपादनिचृन्मध्यमःषट्कश्चेदतिनि
चृद्दशकश्चेद्यवमध्यायस्यास्तुषट्सप्तकाष्टकाःसावर्द्धमानाविपरीताप्रतिष्ठा
द्वौषट्कौसप्तकश्चेतिह्रसीयसी ॥२॥ द्वितीयमुष्णिक्त्रिपदांत्योद्वादशकआ
द्यश्चेत्पुरउष्णिङ्मध्यमश्चेत्ककुप्त्रैष्टुभजागतचतुष्काः ककुब्न्यंकुशिरेकाद
शिनोःपरःषट्कस्तनुशिरामध्येचेत्पिपीलिकमध्याद्यः पंचकस्त्रयोऽष्टका अनुष्टुबा
र्भाचतुःसप्तकोष्णिगेव ॥३॥ तृतीयमनुष्टुप्चतुष्पदाथपंचपंचकाःषट्कश्चैकोम
हापदपंक्तिर्जगतावष्टकश्चकृतिर्मध्येचेदष्टकः पिपीलिकमध्यानवकयोर्मध्ये
जागतःकाविराणनववैराजत्रयोदशौनष्टुरूपादशकास्त्रयोविराडेकादशकावा
॥४॥ चतुर्थंबृहतीतृतीयोद्वादशक आद्यश्चेत्पुरस्ताद्बृहतीद्वितीयश्चेन्न्यंकुसा-

रिण्युरोबृहतीस्कंधोग्रीवीवांत्यश्चेदुपरिष्टाद्बृहत्यष्टिनोर्मध्येदशकौविष्टारबृहती
त्रिजागतोर्द्धबृहतीत्रयोदशिनोर्मध्येष्टकः पिपीलिकमध्यानवकाष्टकैकादशा
ष्टिनोविषमपदाचतुर्नवकाबृहत्येव ॥५॥ पंचमंपंक्तिः पंचपदाथचतुष्पदाविराड्
दशकाअयुजौजगतौसतोबृहतीयुजौचेद्विपरीताद्यौचेत्प्रस्तारपंक्तिरंत्यौचेदा-
स्तारपंक्तिराद्यांत्यौचेत्संस्तारपङ्क्तिर्मध्यमौचेद्विष्टारपंक्तिः ॥६॥ षष्ठंत्रिष्टुप्त्रैष्टु
भपदाद्वौतुजागतौयस्याः साजागतेजगतीत्रैष्टुभेत्रिष्टुब्वैराजौजागतौचाभि-
सारिणीनवकौवैराजस्त्रैष्टुभश्चद्वौवावैराजौनवकस्त्रैष्टुभश्चविराट्स्थाने
कादशिनस्त्रयोष्टकश्चविराड्रूपाद्वादशिनस्त्रयोष्टकश्चज्योतिष्मतीयतो
ष्टकस्ततोज्योतिश्चत्वारोष्टकाजागश्चमहाबृहतीमध्येजागतश्चेद्यवमध्या-

CC-0. In Public Domain. Digitization by eGangotri

द्वौदशकावष्टकास्त्रयः पंक्त्युत्तराविराट्पूर्वावा ॥७॥ सप्तमंजगतीजागतपदाष्टिनस्त्रयः स्त्रौचद्वौमहासतोबृहत्यष्टकौसप्तकः षड्ढोदशकोनवकश्चषडष्टकावामहापंक्तिर्माध्यंदिनीयेवाजसनेयकेसर्वानुक्रमणिकैषाकृतिर्भगवतः कात्यायनस्यैषाकृतिर्भगवतः कात्यायनस्य ॥८॥ ॥इतिसर्वानुक्रमणीयेपंचमोऽध्यायः ॥५॥ ॥कंडिकासंख्या १२४ ॥ समाप्तः ॥ ॥

इदं पुस्तकं भगीरथात्मज हरिप्रसादेन मोहमय्यां जगदीश्वर शिलायंत्रे मुद्रितम्. संवत् १९४० शके १८०६ भाद्रपदमास.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति सर्वानुक्रमसूत्रं समाप्तम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu